९६ पत्राणि

नैषध[illegible]ा टिप्पणिका
मुनरी नामधेया
३७२

२०स

सुखेनशासंनीतइति॥१६॥श्रजइति।अजश्रमनवरतं।श्रयंदेवोराजाकविनाकाव्यकर्त्रोबुधेनशास्त्रज्ञेन
सहसमयंनयनउदयंश्रानिदिनंदधो।किंभूतः।पटीयान्दक्षः।कीदृशेनकविबुधेनअनवरतमभ्यासीभूतःपुनर्धि
भूतेनशास्त्रकविबुधयोरित्यर्थः।उपेयुषाउपगतेन।दिनेस्वरस्येवश्रीर्यस्यसः।सूर्योपिदेवःशुक्रबुधाभ्यांसमुपग
ताभ्यांसहसमयंप्रातरादिकंनयनउदयंदधातिशनदितथानुगतस्तीक्ष्णः।सर्वदाबुधशुक्राभ्यांरविसमीपवर्तित्वा
दिति वा॥१७ श्रथइति॥प्रजाइदंअर्हंनबन्ति।इतिपदंकिंश्रस्यअर्हंरिपयाश्रंकितेविधात्रा।प्रजायोगाञ्चविप्यइतीम
नता।कथमूर्हंचविधास्यतीत्याशंकाहा॥ कम संप्रवाल वयारचाविधानातु नाज्ञांवशिनः सुदानादिति विनर्क्यते।५
१८॥जगदिति॥श्रयंनलः।बालत्वशेषवान्नयंजगजयी नैरूतवान्वोऽयनम्बकोसंग्रहर्षयंकृतवान्।गाणं
कलेलक्ष्मीरितिश्लेषी।अथानंतरंयौवनंशरीरमस्यालिंगत -- कर्तृवसंताविपिनमालिंगतितथालिंगदि
तियोजना।श्रस्यवपुरपिकामसखा-मनुरपिकःसखा।तथाअस्यवपुर्यौवनमालिंगदितिश्रध्याहृत्यताश्रध्याय
तया।विजवनिसायालित्विनकलापादपदइतिपदेनपरिहृता।कियताकालेनेत्याकांक्षायांशैशवशेषतामिति।
जगादिति।एकवचनेनजगदेवप्रतिपदंतस्यनेकःकस्तिदिति।भावः।श्रयंनलः।भवतनामरघुपृथुहनूम
त्प्रभृतिभिःशेशवशेषएवसिंहादि -- महेशमतंगामहेंद्रपुरपृथ्वीहननरविरथगमनादिकं

प्र

हृतमतस्तैः सयानाथमितिन्नावः। अथवाशेशवएवशेषःशेषनागः। नद्यानयंशैशवशेषस अवेऽन
सर्वंहृतमिति। यौवनेदमयंतीलावण्यएवावशिष्यतेइतिध्वनिः। अथवावसीनोशैवनमालि नथि
तांनयतिउद्दीपितेकरानितथायौवनंवपुनालिलिंगावपुःकीदृशंअवनंरत्नणांसर्वेषामिति मुपग
रता। शस्ययौवनंवपुनालिंगदितिवा। अपिकं ग्रंथगौरवान्नोच्यते। सहृदयैस्स्वयमूह्यं॥१९ शिसना
नलवरणनपर्यस्तघृणोऽवारि। अथवपदस्वरणस्यमालस्त्रीयेस्यातत्पर्यंपदशोनाधा मखूतैम
महापमयामहानिरितिघृणायुक्ता। नकरस्शानालेशापिकआ -- नास्तीत्यर्थः। पंकजेतिर्कं ना। ५
मयानायनः पल्लवेतिपाठपदालवः पल्लवः वरणेकदेशलक्ष्यादेशस्यनकेनणसा गौणं
तन्मुखदासचापिशरत्सूर्लिमावंद्रोऽधिकारितांनजीनः। तदाननसदृशामाभूदित्यर्थः। लिंगादि
नायपरस्त्रीदाशः कथमस्यास्याः स्यदास्याधिकारितांयाउइतिध्वनिः॥२० किमस्येति। विनताअथय
श्रीव्याडेनकाटिमिह्निस्वापिः हृत्वायुगणान्हकिमङ्गीगणतगणयामासा। विवेर्विधानवै वतामिति।
हेउः। नामकूपव्याजाऽऽहृघणोऽन्यविंदवखनहृतानगहृताइपितृहृताएव। सूक्ष्मविंद थुहनूम नादिके

न्यैलेवयद्यपि दोषस्तथापि जगत्कर्त्रैकदैवमेव उत्कर्षहेतुः ॥२१॥ अस्तुष्वेति ॥ अस्यनलस्याग्रेऽरुन
ति दुर्गस्यवसुहरणे अर्गलदीर्घपीनतेसुधेत्येस्त्रो तौ । उरः श्रियापुरद्वारदीप्तकपाटानाकलनः पुनर्धि
रिताबरद्दीता । असावेवायणीरनत्ववद्धर्षे । अयतस्त्विनरह्रूणसमर्थवस्त्वेनैवग्रहीत त्रिासमुपग
स्वकेलीति । नन्मुरवस्य प्रतिमासादृश्यं स्त्रावनजंगमेनास्ति । कीदृशस्य स्वक्रीडालवमात्रस्मितै परतशिवनाऽि
शशिनः । स्वभागलोवनेनैवतिरस्कृतपद्मसंपदः । एतौ यातौ थिनौ तस्मान्मुखसादृश्यं वनाव छत्रेमा
६ सावसाद्यी वेतित द्वयी न विद्यते तत द्वयी जिवरं जयनशीलं सुंदनौ नरं वस्तुमत्र एवंभूते चनाव कृतौ । ५
मानास्तीत्यर्थः ॥२२॥ सनौ बुहेति ॥ त्रैवकायां । जलजंतस्य दृशेवतर्जितं । हसितेनैवाऽनेत्रवद्भसी गौणं
नवकूनी जयहृति । वक्रत्वेननयुज्यते । कुतः पवाज्रवगुत्तमी । अहोतनुरवापमायी महती द्वाय
२४ स्ववालेति ॥ तमर्थेवात्मवालभारस्यकथयति वालवापली केशवं वल्लती किमर्थं कथयति ।
अनागमेअनपरावायपुनः पुनः पुच्छालनव्याजात् । कीदृशस्य लडत्रमीगजेभुलानिला नूम
शि- श्वासनंनदापाय । शिशिरं कथमित्रितेत । नलकेरान्यो लघवायतः । महीन्द्रनेति । तादि कं

१०

द्विः प्रकारस्त्रिलोकीजातानां सुंदरीणां कंदर्पविभ्रमः संदेहोऽभवत्। कथमित्याह। तस्य नाम्नः कामको
त्या संदेहः। स्वहृदयस्य तं प्रत्यभिलाषेण कामविलासो जातः। रूपेण कामस्तुल्यः स एव तासां साम्यमिति
॥२६ निमीलनेति॥ सुभ्रुवां कामविभ्रमं दर्शयन्नाह। अमूः सुरांगणाः। तं वैयासाधिकं प्रकटयंति। लोच
नेऽनिमेषस्यन्देशः। तं कंचन स्तोनलं दृशा भृशमत्यर्थं निपीय निर्दृशामिन्द्रपार्जितः। किंभूतया दृशा दर्शनाशक्ति
मता निमेषच्छेदवत्या। एतेन देवीनामपि कान्त्यायमित्युक्तं भवति॥२७ अदृष्टेति॥ पातालांगनानामपि का
म्याचमित्याह। नेत्रयुक्तानां प्रियाः सुनेत्रद्वयं सुवन्ति निंदं निस्यनलविषये एतद्दृग्द्वयमस्माकं नलाव
लोकनेन फलपूर्णं जीवितं। तमदृष्ट्वा फलजीवितमिति॥२८ विलोकेति। न लस्य दर्शनेन विघ्नवो वि
मानुषीनिर्न्नाली निर्निमेषस्तनः। कथमित्यत आह। विलोकयंतीभिः अनवरतं यमनावलोकनवलात्
नेत्रनिमीलने च पि। अपि निन्नक्रमेवानिमेषनिर्मितापीति॥२९ नकेति॥ कानापि कात्रिलोकीजाता।
तेन शर्वं स्वप्नगतेन न दर्थपिनुसर्वा एवेत्यर्थः। कान्ता नाम भ्रमेण नल उवाच। न लात्मतयाविहितनपनि
काकावा स्वकामोदयीनवकारा। नले विन्तासंगः सर्वासां जातइति ज्ञायते॥३० प्रियेति॥ कयानापिकया

ॐ२ स्रि२

ध्यानमुकुरोनिः श्वासधूमैर्मलीमसीकृतः अविज्ञसर्वेया। विहायदमयंती। नलमालोक्य सुमनोहरया
स्यनूपानुरूपाहमितिदर्पणस्थमवलोकयितुं रतः। भैमी विहायान्यास्त्रूपयोग्या न भवंतीति तात्पर्यो
र्थः॥३१ यथेति। दमयंत्या। चित्तमिदनो व्यवसायो वनेन लक्ष्यमानः प्रवेशितः। कीदृशेन स्रोगतिसुखवतो
जिना। मनः कीदृशेनलोक प्रवणे। दृष्टांतमाह। यथा बानेन नगरं रुद्धे सत्य नितुच्छ प्रद्युम्ना व
यसागतुडेण सर्वो रक्षिणा नलप्राकारवेष्टितं लक्ष्यमानः प्रवेशितस्तथा दमयंती हृदयमपि प्रवेशित
७ इत्यर्थः॥३२ नृपेति॥ सा दमयंती। तस्मिन्वाजिवरूशः आतिपथमवतीर्णेनिजरूपसंपत्तियाप्यविश ७
शिष्यातिशयमनदिदेश सख्यापयामास। भीमेनिजयानकतानरेंद्रशब्देन प्रभुत्वाकर्षः नंदनाशब्द
नस्नेहातिशय इत्यादिशब्दशक्तिघानाद्यजाते। मतः किंनूतं कामदेवं कायत्यामित्यर्थः॥३३ उपासनेति
सा दमयंती सज्जा तेन सकेना निश्वासरुद्रदेवादिका धातुपारायणे सेनां वितुवादिने दिने प्रतिदिनं। वंदिनाम
वसरेषु सेवासुतानः पठत्सु तेषु वंदिषु। प्रतिनलोत्कृष्टेत्वी अलमत्यर्थं पुलकिता जाता। तेषु पठत्सु नृपती
न श्रुण्वती नलं प्रति विनिद्रो माभा ना इति वा॥३४ कथेति॥ अन्यानन्यामुदाहर्षणनन्तअवणसरूक

वलोकनेन निमेषशून्येत्यर्थः ॥ ६६ क्रमादिति ॥ [illegible] एष नलः इन्द्रपोत्तमश्वेंद्रसदृशः प्रभंजनस्यात्मज
यनार्थविगा यस्य एवंभूतेन वाजिना कृत्वा नगराद्[illegible]भूः ॥ तामिस्रौ कलाचनवृष्टिभिः सहास्रा - क्लीथ
नमनलाके न वलोकित इत्यर्थः ॥ ६७ नतइति ॥ [illegible]लक्ष्यनासीनगते अश्ववारसैन्यद्वयेमिथ्यायुद्धं विस्मापय
यामास । तं नसोत्तुकाव । तदनंतरं प्रतीक्षप्रहरे[illegible] - सा[illegible]णी प्रसरेतिवा । अन्योन्याज्ञाविनइ प्रविशेषे प्रीते
॥ ६८ प्रयात्विति ॥ अस्माकं न लितुं - यत[illegible]मियं - - अपितु पदद्वयगम्यापि न भवति । तस्मात्त्वं लघिम
उत्कलायतां । इतीमास्वेः स्वेवनादर्शितैः [illegible]विनोद्यकर्मरजः उज्ञापितं । उत्तोलितं वा ॥ ६९ सूनेविति ॥
हेन विज्ञानेन कपटेन यत् स्वैराक्रमितं तस्य नमसः ॥ नोऽस्माकं बहूनां हरीणां चक्रमिप देयाकेमणोसा
तिलनऊाइति कृत्वा नघिनमुखे वद्धोकाः शरकृतं वरणं स्वैर्वा घुष्टितं । आनिवर्त्मना याम्यत्वं रागत्वे ॥ हनिशश्च
क्रस्वा ॥ ७० वमूवत्वा इति ॥ तस्य सेनास्वनाः सैन्धवाः सिंधुदेशोद्भवाः ॥ मंडलीगतिविशेषमस्वानां विकानया
मासुः ॥ स्वयं कुर्वैत्येव तानपिकानि तवैनइत्यापि शहांर्थः ॥ विहाय स्वदेशं क्रीडास्थानं तं प्राप्य । किमिति कारयामासु
विनिहेतुमाह । जिनाक्षिषु वोढशाख्रो क्रिषु आहतनाया । आद्यस्यास्मीत्यस्मिन्नर्थे पश्चात्प्रद्वयोरणं । सिंधुदेशस

पृ०स

वविघाः अतएवोत्प्रेक्षा। वीक्षानामप्रवेत्य वेष्टन नूपा मंडलीविहानाय्युद्धायतनं। नूनिवक्रवानयथा
वति॥ ११ द्विषड्भिरिति॥ इती वधानां अङ्गगति त्यक्त्वा तुरंगमैः अमंडिमीडितं स्थली। मंडलीकरणशो
नयाहत्वाथ मे वानयावाश्वे तेश्वा; पर्वाद्धिषम गत्याः। अस्य शत्रु निवेव दिशां लंघने कृतं नीत्ये तितात्व
घः। कीर्त्तिनिवेवस्ता कतां हृताः समुद्राः समुद्रपारं गता ४ इति भावः। उत्प्रेक्षा॥ १२ अवीइति॥ मत्तुनवा
सुः किमुत्प्रेक्षायां तास्तु न्रमीसुनशि रुले। न जिज्ञासयत्तु अपितु औपि जिज्ञासयत्यव। निरूजिज्ञासाया
१२ मात्मनेपदं। विस्मार्य्येवात्यामयसम्रूहत्रमणानि। तास्तुकाख्विर्हत्या हाक्र्त्र्थवसाद्धि नक्तिच्यात्ययः। १२
उक्तिवशाद्वायामंडलीश्वात्र्ययघानवानिह येन कृत्वा नकानयामास वात्र्हयेनवा। आन्मातपत्रनला
स्थलेनलः। याकारयामासनलः तामंडलीः किन्नसुसि। कृतेस्मृपगिताः कनोतिइतिवा॥ १३ विवेशेति॥
ततस्तदनंतरं सवाञ्चामुहूर्त्तादेव विलासावनं ये यांकयाविवेशाइविराट्। गत्वा। पल्लवनागच्छात्। नि
विडछायां विस्मृयेच्याग त्वा विशति निजुनार्षिनयाद्दिति भावः। कीदृशी प्रवालैलौहित्यसुवितनि॥
मेघछायेघनस्यवकीर्त्तिघस्यतां। शायनेडयाद्र्यमनेसर्वीयद्यापितयावि गत्वाप्रविश दितिलो

देवा॥ १९ आलीति॥ भ्रमरमालया कृत्वा व्रजती तिव्रत्तुते नभ्रमरगमनेन वाऽन्नमुकुर्लं चंपककुसुमेव धूमकेतुम
शीकत्वं॥ आतंकाविशिष्टः। वंचन दृष्ट्वा दृष्ट्वा विरहिनाशाय ऽदिति। अन्योपि विपदे ऽदित्तिपश्य ति॥ २१ गल
दिति॥ पतन्पनागोयस्मात्। भ्रमरनूपयातं प्यापतत् नागकेशरकुसुमंददर्श। प्रसक्तासंलग्ना भ्रमरमालायत्र
कामवाणघर्ष - - हलनस्खलनं। पतंतः कणायत्र कुसुमतरौ। भ्रमरालीशरसमानापरागस्वर्ह्मिकणसमः
भ्रमणीवसाणे पिलोहोत्रौऽ - - मयेप्रवत्य वासाणे। यस्मान्नीड विशेषः॥ २२ तदंगेति॥ कामोलङ्क्लितः
शिलीमुखाली भ्रमरमाला विलोक्य। नलींगंल रुकृत्य पुष्पात्पतनशीलाः। कीदृशमंग सुगीघिं इत एव त्
णयाहि एपः। स्वनंतीः शब्दायमानाः। लज्जायां हे भ्रमाह। स्वनंदेडात्कुन्निर्गत वाणभ्रमात्। सदृशे भ्रमइति
सादृश्यमाह। शद्वछलात्रयिली मुखालीनित्पतोवाणावली ज्ञाने नस्यच भ्रमरा एववाणा इत्यपि। गुणस्पृशइति
मौर्वीसंबंधोपि ज्ञायते। कुसुमादिनिर्द्धनुर्योगो त्रुध्यतो अतएव तु निर्गत निजसायक भ्रमरानीगस्यजातः या
सरा क्षमा दोषः। अतएव लङ्घितइति युक्तमुक्तं। अन्यत्रापि पुष्पादिवलनेसानि शङ्कतासायकनिर्गततासेवक्षत्तु
१० दिनदूषणी। लोकवाद प्रसिद्धे॥ २३ मनुदिति॥ वातवलितपल्लवकीटकैः कुनी ... भ्रमवतसोनस्नेय

स

स्यतत्र।वेश्यास्तने नखक्षतोपमं विल्वफलं।पाक निर्वृत्ते पचेलिमं ददर्श।स्तनोपि चंदनादिभूषितो भवति वेश्यायाः नरव

रूनोपि भवति।विरहकनमर्दनाश्रसंचितोपि भवति।कुचौ वर्त्तौ संविनीतौ सेति वा समासः।संविनीतौ च स्थितौ।।८४ युवेति।तउ

णमिथुनविज्ञाने मज्जनयोग्य कुसुमपूर्णमध्यनैव कामभूणीवीह।तां कुद्यानयां भयामाट सायुक्तं भूलीरूवाप्रकीपितः

त्रस्तः।।विरहितयेतिभावः।।८५ मुनिनिति।।अगस्त्य तनुः स कलिकः श्यामो नाशी नांकुरिति ज्ञातः।कुश्चपरूढीण

ताथाजन्म हिर्ति कलासम्भूरुहं वाऽद्र प्रज्ञितान्निवोत्थ रागर्भः।।किंतरा धाम्बहरूश्यामलतया नांकुवक्रसाम्येकावक

१५ गुप्तनया कलासामयेमिति प्रसिद्धिः।।८६ कुनइति।।पुरः प्रथमं हगारस्वायतया अद्भिशानेनितांहिमवशेन पांडु १५

नपत्रस्य ख्यानवर्णेथे न तस्य वायाः।कुसुमपुविषये क्रीडास्सैनलं मीलं त्रिमीलीमीलेतीजायमानानिमीला

नेत्रसीकोशायस्यती।पनागपतनादिति भावः।।सोन्मेषनिमेषंबकुरितिवा।कीदृशीस्ताः लतायां कृतविशिष्टवलन

विशेषाः।विरही वद्धदीपनविभावं द्रष्टुं न शक्नोति।अथवकस्य वितताकस्य बतांकानेनाहृतशुभ्रवसनस्यक

स्यानविनायिकायो कृतविलासाः कामक्रीडाहृष्टाः सत्यः उन्नमपुष्पं मीलितनयनं कुर्वती।तिभावः।त्रा

वृत्तिर्दीर्घापि प्रयुज्यानेसद्भिविनिकोयांतते।।८७ गतेति।।सनलः कथं नाग्निर्नदति स्म यत्र विन्दुसौतिरवाह

नमस्कारं कुर्वतः फलमनेनानन्तेशिनोपि कृत्वा कोविदमानानित्यादि। नामामलकी यस्याः यो नूनागो महच्च
गताः॥ स्मनपायिकायाः कोऽयं हृदि मागताः ती या च्री मत्यर्थं नम्रेः शिनो पि: पुण्यगो न वर्ण नमतो जननानलोकः
स्नोती तिभावः॥ ९८ नपायेति॥ वनवासुनि अग्निन इव कृतं। मधुनी कृतं मकरंदैः केतक धूलि पि: शुभ्री कृती। इदृशी
अन्नोमदः रवितेजः सदव कौमुदी यस्य तत्पर्वं विरहिणां न लायसुखदानं ददौ। वियोगिन लक्षीद्यालोकोऽदुःखाय भव
तीति भावः॥ चंद्ररूपं गते रवितेजस्यापि दुःखं भवति। इदृशी मदः॥ हर्षमदनं चंद्रालोकस्य वसन्तदन्नइति वा व्याख्या॥ वियो
गिन मस्मो सुखान्नरीदन्नी स्मितेत जसा तदेव मदः कोन्यपी सुखं वनददौ इति वा विरहिणां रविजेन कौमुदी सुख वि
पनीन लक्षणायाव दुःखमेव नाददन्नश्च पिनु ददौ इति कश्चित्। रवितेजस्वी द्यालोकसुखं वियोगिने नाददत्त्वपितु
ददौ चंद्रवैरी विरहीसूर्यापि अतः समानशीलतया सुखदानं। अन्यच्चापि च शत्रुशत्रुणा सह मैत्र्यमिति भावः॥ ९९
अयोगेति॥ विरहिणापि सा द्रादवापिते सुखं चंइ पश्यता विरहिद्वेष लोहितनेत्र ताम्रकूट ज्वनाकोकिलनचंद्रवैरिणी
आहूतेन तुल्येन द्रागनि:॥ अथ वकुकूट शब्दकोकिलो जात्यवानवर्णज्ञ तेनि सम्यग्दादित्वा न्नक्षिपकुकूट ज्ञतयस्यसः॥
तेन कूटशब्द नाश्वनावत खीद्रा विकी विनहपि चंद्र सम मित्यपि शब्दार्थः॥ १००॥ अशोकेति॥ अयमशोकी वृक्षवि

शर्वीकिशलयैः कृत्वा स्तृतम दनाग्रेयास्त्रसमूहैस्त्वत एव नदुं तमिवश्चीकृतवान् । कान्तकृत्तमित्याह । पांथान्तविं
घनेशोकायस्या विदनया युत्वत्या सार्थकनामघत्याशया गतान । शवल्पं नकृकं । अन्या पिशमणगुघगती पिचायः ॥
प्रहतं स्वांगेप्रतीकृतीतिनाव ॥ १०१ विलासेति ॥ क्रीडावापीतीरेलहरीशह्याद । कोकिलाहितेफयो विंनावाहम हृन
मृत्य विशेषलाघवात् । हेतोः नृत्यगीतवाद्यं अरण्ये पितिनलमाननाधा ऽर्था नत्वत्यासमाह ॥ कसो गीत्रा घ्रोक्ति ॥
१६ नार्थीनियतिं प्रजतीतिमान्यत्राकू जनालोकः । विरहितयातौर्यत्रिकं तस्य सुखाय नघवनिक घ्नो गसाधनतात १६
याविमदूनादीनी लास्यादितूपतौर्यत्रिकंतेश्चा नवाधेति वदता व्यापानोदर्शितः । कविनामसुरसादीना नञत
वनलक्ष्मीकनापि भुज्यत इति भोगः । वास्तवी एषा नि ऊक्ति स्तेषामस्येव । नलसंवंधिनीसातन्कलाले नास्ति । मानूयात्
तथापि तभोगाः नीवागसमीपयुवतिः किन्नयुवतिः । अथवा वनेतै तौर्यत्रिकंतेन घकेलंकापिनानवाध । अपिनि
त्वक्रमे । कस्मादित्यतआह । नाग्यमाङ्जनोभोगमाप्नोति । तस्यदमयंतीलाभोपि नास्ति । कुतो नाग्यमा नके इत्भोगप्रा
प्तिरितिभावः ॥ १०२ तद्दिति ॥ तौर्यत्रिकं यातं सुनि विङुदावलीपाठकाः केइत्याह । शुकाद्यापय विशुक्रा स्तमसुवश सावि
कास्वतसुपङ्कजः ॥ १०३ इतीहवां ॥ इत्यनेनप्रकारेणलीलसौरत्राथे दीवनेभ्रमनेर्नगोपनीतादि शुकमुतापि ।

कारण्डवनलघुतया ॥ पद्मीकृतं ॥ निःफलीकृतं व्यवसायमुद्योगं व्यवसायं प्रतिज्ञाय । तेन हंसेन मोघीकृत-
त्यन्वयः ॥ अन्यान्यदत्तहस्तताले यथा भवत्येवं सखीभिर्हस्यते । हसितैः तत्काले व्याप्य । परस्परामिति निपातः ।
समुदायार्थे ॥ ६ उज्झाटनी ॥ इदानीं करतालिकादानाद्भवतीति उच्चाटयितव्योयं हंसः । अत्रस्थानेयासखीमामत्र
गच्छति सा मया संरुध्यतां कुपितेति वत्तुर्थी ॥ इति अनेन प्रकारेण तया सखीसमूहरूपा लब्धः ॥ ७ ॥ हतात्पकोप
अथान्तरं साश्यामामुवति विशेषः वृत्तेषकोपासहवरीणी हसिते । हंसस्य पत्त्रिणः हस्तघातनतावर्धहेतोः क्रीडा
लज्जिता सती पत्त्रा ख्वगति स्म । हंसस्येव । यथा सूर्यमभि व्रजतः श्यामा छाया गमनीया नवा स्वर्हेतोः पश्चाद्भवात्भ-
वति । एतेन समीपगतिः सूचिता ॥ ९ हस्ता न हंसा । ताभिः इति छलेन उपहस्यमाना कथमित्याह । हंसाभिमुखी सूर्या-
भिमुखी या यावान शक्ता न समीचीना । अथ च हंसः पक्षी । सा अहस्य विदिता शर्मीयासती । अशकुनी अशकुनदाना । अ-
थवा पक्षीनैव नवेन - - - । अविद्ये प्रियकथकः एष हंसो न विः यतः अतएव अकृत ऋतदानाना भविष्यति मम हन्त
अन्येषां यथा तथा न विविक्तार्थः । एकत्र न भविष्य प्रियो न लः । अपरत्र धारणे सति सौख्यमिति भावः ॥ ९ हंसोप्यसौ
हंसोपि हंसगतेः नैम्याः स्वयं अग्रे नमाणीयं यथा त्वं गच्छन् शुशुभे वेलस्य हेतोः अदसीयी गति अनुकृत्य उपहस

नविस्यत छद्मदो हंसो सत्या सा

तृ०स

त्रिवानय नं सखीमि: हसि नासा हंसो यस्या ये शुश्रुस्ते गच्छन्त्। अन्योपि कस्यापि गतिं मनुकृत्य हसति॥१०पदे पदे॥
सा ना विनीता वसुका आगामिनि पदे पदे चरणविन्देपन्तूपे। यथा हस्तयास्य ऊना नाति तं दंसीय यातेन प्रकारे
ण सा कूशी गीत न्वी धृतार्थ प्रलो स्पल तामध्ये सक्रीडं गच्छ ता हंसेना कृष्टा॥११ उद्यानि विद्दालि॥ का वन निवानि नस
खी जनान्त्र तएव का ये वद्धितीया सरु वरीयस्या स्त्री। यदा एना मा कलितवान्। की दृशीं अभङ्ग लकणि काः लं कृतया
३६ चारी। न दाशुक वद्र मनुष्य वचनेना वो वश॥१२ अमे किय॥ अये वाले क्षमयंति। किय दूरं यावत्तत्रुपे लिउयगाच्छसि ३६
मत्समीप मागच्छसीत्यर्थः। ने वाले व्यर्थं निःफलं इक्षमनेना कार्येण किं वा पविश्रामयसि आन्ता भवसि। यदि श्रमो
नास्ति तदा नयं नोदेति नोत्पद्यते किं। नुअहो। ने तव। अवलोकायं त्याः घनाः निविडाः वनमालाः॥१३ दृष्टोपर्यष्टीती॥
परस्य अवलोकया। अर्थात्र कर्म्मतापन्ना वनमालाः वाक्यार्थत्वात्रानि बेन तीवत्री एषा वनमाला। कीदृशी त्याह। प्रनाद
न र्ङ्कानवती। कैः कृत्वा। वायुना बलत्पल्लव एव कराः कैः तस्य कंपनैः। कीदृशी त्वी दृष्या वर्धं अपदेश स्थाने ः र्पि अर्पित
पदा यौ त्रिवर्थ को योगवतीं॥ सरुवयरुया तादृशीमेव निवेदयति॥१४ वार्यः कथं॥ कथं कानं कथं हवा इहं वत्र्र्वेद्गः।
गगानसेवानी। जवत्याचय या वसुधायामेव एकस्यां गतिर्गमनं यस्याः तया। अहो आश्चर्य्यं। अनेन वयसापि चमंगमिचे

नजानाति। अन्योपि क्लीदसः रसे नयंगा ननसे नअनुरागेण वा स्पर्शकैरमालिंग्य सुष्ठितां कामपि निपुण द्वि
२० प्रियस्तदा॥ लक्ष्म्याः तदालिंगनं ज्ञातापतिव्रताव्रतहानिर्न्निर्भूता। तस्याः भर्तुः नारायणस्य। इष्टो कलुष्या
ष्या अणुनापि स्वल्पेनापि। नजातं नोत्पन्नो सर्वभूतात्मकेन। उत्पयत्रापि स्मयमेव हेतुः। सर्वं विष्णुमयं जगदिति।
॥३१॥ विकं विवेः॥ विवेः विधिपुत्रुषस्य तं पार्श्वे विकु। समयानि कषायोगनि द्वितीया। कीदृशी अज्ञा नलज्ञ
निर्ल्लज्जमित्यर्थः। तं कीयः पौर्णमास्यां ... विंद्रं सृजति। नललमुखं वं प्रोत्तमामित्यर्थः। मन्ये सहस्रो वानुभ
विज्ञः कुशलः। कृतार्द्धपिंडं शिव शिवसि यस्मात्याज्ञा नललमुखवं प्रेसति अनेनाल मिनिनावः। योनिर्मीति
यः। अज्ञतया स्मृततन्मुखश्री निनिपदमुनयत्रापि योज्यं॥३२ निलीयते। निलीनो भवति विलुब्ध इः। अस्या
कं वचनाशं आत्मजे त्रैं नललमुखं कृत्वा। कदाचित् सूर्ये प्रविशति कदापि समुद्रमध्ये। कदाचिदाकाशचक्रमध्य
मध्ये निलीयत इति सर्वत्र योजना। उत्प्रेक्षा ध्वनिः॥३३॥ संज्ञापनः॥ नारायणो नोस्मान्नागत्य सेवकवर्गा न्नम
सीज्ञाप्य। किमर्थं आनिक्रांतमज्ञं येनतत्र। जितसकलनललमुखमत्वाय। तत्र स्वस्वरूपेतोः संकुचन्नाग्नीकमलगो
पितान्नब्रह्मणः बिलज्ञ लज्जारहितो यथा भवति एवं ल कृत्यांकोडिति। नललमुखमनोज्ञस्तत्वेतासिलज्जयाना

श्रीकमलैः संकुचितैः अतो लङ्कारहितैर्विक्रीडा॥३४॥ रेखा मिः॥ अस्य नलस्य मुखेन रेखा निर्मितोर्विंशत्वादेतन्मम
यी मिः दंतरूपा निः कृत्वा। विंशत्याद्याः संदेकत्वे इति वक्तव्यवचनस्थाने एकवचनं। अतः अयी तनेवचतुर्दशाष्टाद
शचत्वाविविधाः संनिश्चयइति किं कथयामास विविधः॥३५ प्रियानरे॥ नलस्य प्रियो योऽसौ पत्नी हृद्या।
कामधुर्नदैवौ नस्य रामः। सम्यग्यासेनयाथार्थ्यविधानेन नष्टः थीधैर्ययो। तस्मिन् नागराजजिनो बुद्धविरूढो
न विद्यीमः॥३६ विनापतत्रं॥ विनापत्रे गरुडरूपैः वायुभिः लोचनपरिसाधनीयैः। मनोभिः मनःप्रमाणैः। कृत
मादिकृतदृश्यैः जिनानासीत्। अपितु सर्वे वेत्यर्थः॥३७ संग्राममह॥ रणभूमीषु॥ नदीमातृकतां प्रयाति तु धि
नेः गर्हेतु निर्गताषु। नलवाणधारणा एव सर्व्याः तेषां कूलानृपसमूहप्राणैः कृत्वा सुनिरूपनदीमातृके
देशे न्यत्वापि सुमित्रकृमिलिं प्रसिद्धिः॥३८ यसोयदा॥ अस्यानलस्य वाक्यनाकं कूलत्वं अस्यार्थेन नलः। कीदृशः हित
वामित्यर्थः। चाप्रमता। यसः यदजनि। तत्तस्मात् कनकगुणोदेवा। निर्मितोव आपगा नदी तस्याः आलोपं किः
तस्याः कूलंकरवचयसनैः स्वाजावः नदीयं॥३९॥ यद्दित्रिलोकी॥ जैनो देगलानाचनगणनया अस्य कं स्या
त्रिलोक्याः जीवितस्यावसानेन नवेदशापयार्द्धसंख्यया अधिकागाजिनसीख्या यदि नवेदशालदा गण जाया अस्य समस्त

ज्ञातइत्यर्थः। खलु अहोदशायाउन्मादनामनलाख्या दशमी तयाकलिकयागगनीपुष्पान्तु आनाय्यापि प्रापय्नेइतः
कानकनूपैवासागगनकुसुमतुल्याभवचित्यर्थः। खलुएवार्थे नमएवपुष्पतुल्या इत्यविकल्पिवृ। दशम्या विप्रा
न्मप्राया दशेत्यर्थः॥११४॥ त्वयिस्मरा॥ कामपीडातः सन्तते स्मिनवहिनेननाऊत्वद्विषयेसंप्रेजितोस्मि। आगत्यस
गुणानुग्राहिण्याः त्वत्याः आवशानेनकृतकार्यो जातोस्मि॥११५॥ धन्यासि॥ हे रत्नेमि सार्वं धन्यासि स्पृहाहोसि।
अयात्वयास्वगुणैः कृत्वा नलोपि अपिशब्देन सर्वोत्तमता। आरूढः अन्यदपि रक्तु निर्बध्वान्वारूप्यतो। कोद
सुकर्षोमिमेत्याशंक्याह। इतः अस्मात्कारस्तुतिः चंद्रिकायाः कौमुद्याः य न्दऽदचिमपिठुंउ त्नवल्लीकवोसिऊ
द्योलकैकनोतिऊद्दीविमितिवा। तव्हेजायासीवंवेरुंगानयसाख्ये ऽ इति नापि चूसींवंचो हष्टान्वात्रनोविनी
दोषनसावह्चोत्रवत्तो॥११६॥ नलेनमा॥ नैषधेनकृवात्वीशानम्मूयधा शशिनानिशाइनःभोचतोत्वयाकृ
त्वानलःशान्तनीनिशीथिन्यावंद्रद्रुव। युवांयुयुक्तुःयोक्तुमिष्टुःसंघटितुमिष्टुःविधिःपुनःपुनःअहर्नि
शंतघुग कनिशार्वद्वमिथुनस्यघटकोयोग्योउपास्तेअन्यासेसवनो। ऽऽत्यर्थः॥११७॥ मनद्वयं॥ नल
स्यमहापीडितपवर्द्धिकानीपत्रानलीनां किमपछदानां विरचनासमाप्तिर्यदिलभ्यतेपघोकुत्तयुग
लेतवहृदमयन्तिनिन्यनायिकास्तनेनारीकायावद्भ्यिपघनिनातवैवकुचयुगलेभवतीतिभावः॥०

याः१

८०स नै. प्र. २

एकः सु॥ एकश्चंद्रः स्वलोचनद्वयस्य अतिविस्तीर्णत्वात्संतर्पणे क्षमः कथमपि नस्यात् न संभवति। तत्रस्माह। नलमुख
स्वचंद्रस्य द्वितीयो नवतारुण्यसेवनको अपर्यंतत्वेपि क्षमः। अथवा नत्वास्य द्वितीयस्य द्युतिर्द्युतिरिव्यासो सद्वितीयस्येति क
र्मधारयः॥११९ अस्तोत्तम॥ अहम्नो स्वर्येनैष धीयः अमी मृदाधि चारुतपएव कल्पद्रुः॥ यस्य [illegible] लि जाय प्र
न नखएव स्फुरंती ईदृश्यमाना अंकुरश्रीर्यस्य। यस्य द्विपत्रैव भ्रूयुग। यस्य कलं वः शाखा तवाघनः राजते॥
स्वल्तू त्वं रूपायी॥१२० यस्तो॥ यो देवतनुः तवकन्याप्योपल्लविताः सत्रनूतनः। नवविहसितेन मुकुलितो यः। तवी
५० ग सुकुमारतया यः कुसुमितः। तवैवस्तनशोभया यः फलितः। अस्ते इति सर्वत्र योजनीयं॥ युग्मं॥१२१ कोसी ५०
रु॥ वामुतयोः अन्योन्यानुरागस्य तुल्यतासी पारदने। कामेन। सिशः क्रन्नश्मिसमूहाख्या त्वानानावस्यैयटित
तुलाचंद्रमंडली कांसी कृता आसीत्। स्वल्प्त्वं रुं। नसो कर्षस्वतुल्यतायां यथा युवयोरनुरागः समो
भवति तथा कामः इच्छतीति भावः। अन्यचापि माने तुलाक्रियते नत्वरश्मिनरुः। शाह्यकले नहूत्यपि॥१२२ सच
क्रता॥ सात्विकनाबाष्पश्रुत प्रस्वेदएवमहाृढैः सिक्तः कै तेनसीइ घनेस्यार्दवा। नलकरकमलेत्रनैगोस
वेषु सुरत इत्यर्थः। प्रथमं लग्नाः पश्चादलग्ना एवांछितः। वकुरपत्रले रवा ४५ आवल्याः। अनुनाकिं क्रियतामि
त्याकांक्षायामाह तन्निर्गताइति। नलहस्तान्निर्गताः नलहस्तमेव भूयः पुनः प्रविश्य त्विति अर्थः। कमला रपत्र

वल्ली निःसरन्ति स्निग्धेन च किमपि अवश्यमेव उत्साद्यते इत्यपि कश्चित्॥१२३ एवं चार्वङ्ग्या घनानां सुरतमेव बाहुयुद्धं तेन रु
चितैः पवनैः पुनःपुनः प्रयुक्तां पुष्पवर्षं क्रीडाकानने युवा तरुणो प्रतीच्छतीं अन्योपि मल्लयुद्धदर्शनसंतुष्टः पुनःपुन
र्ददाति। अत्र च एवं वार्ता मल्लयुद्धं दृष्ट्वा मत्ततो दयाः पुनःपुनः कुसुमवृष्टिं त्यजन्ती प्रतीच्छतीं इत्यपि केचित्॥१२४ अन्यो
न्योन्यसमागमात् ज्ञानलस्य तव। चित्ते तस्मिन् प्रविलसद्विलासे अनङ्गदेहं अद्रष्टुं। किमिवेत्यत्राह। आदौ प्रथमं प्रवृत्त
द्व्यणुकोत्पादकौ परमाणुद्वयमिवाद्यती॥१२५ कामः॥ कुसुमेषुः कुसुममयधनुर्गृहीत्वा प्रोज्झति। अतनैव चैवं अतनुधनुर्लता
वामासाद्य माद्यन्निहृष्टो भवति। नैषधीयधनुर्लतायां च तुल्यं विशेषणमाह। अत्र कुसुमितकुलज्ञाताम् एकत्र गुणादिब्रणनाहि
ताम् अयनत्वाद्विचिकत्सां दयोदिगुणामेकत्र ज्ञानोपि तमोद्यौ कामपत्न्या घीवायां गो अलङ्कारः तद्घटिकाया पञ्चैवमूलल
ता तयाऽपि पल्लवितया कृचाशोभमानी विलसर्षि इन सुन्दरी भावस्यमावस्तया भ्राजिष्णु कामपत्नेय अत्पुष्पा धनुर्ल
तायामपि पक्षापक्षपत्री क्षणार्थं पक्ष्मकपलेखा भवति सावासैं इतसदृशी। एकैवेत्यालम्बनार्थं सूत्रलतायाः पल्लविता
याः पक्षो निवद्धो भवति। धनुर्लतापि॥१२६ चकुक्का॥ वदीयहाने लता मुक्ताफला निगुलिका॥ तीन लीना जहंसीश्रलोभ
रपतो हंसीविनोः कामदेवस्य वेध्यैलक्ष्यं जानीहि। तद्भिसिधौ धनुर्लतोत्थमात्मानं विद्धि यस्याः धनुर्लतायाः नि

त॰स

त्यांक निवासेलालित तमाश्च त्पर्थलालिनायामोदीतयासद्यमाने। पालित तनिवापाठः। विलासी। नोमा बलिः
हदीप्यमानना त्पेवविलेनं द्रंयस्याः साएवं भूता। श्रालेवते स्वीकरोति। गुलिका धनु चितिलोकः तत्रापिएते गु
णानवेति। १२७ पुष्पधुः॥ तेननलेनजितः कामश्च वाणसमू हे तवके शषु कुसुम मूर्त्त्या वादित्यर्थः। तवललाट
मूले धनुः। त्रिलोचना क्लिश्च नुचाद्धर्यः श — विरूपतिसर्घेत्रानुषज्जे। निर्विद्य निर्वेदं गत्वा त्वीत्रा श्रमेयं स्था
श्रयतशि श्रियेसकामश्च। नैषधः यायाश्च ध्रुनाइदानींत्व कुवपर्वते सीश्रयापत्रालीकामपर्णशालायते। श्र
५२ न्यापिजितश्च निर्विद्यार्त्ति तिशती तिश्चतिः। अनुत्राधुमिति। श्रयीनावसमासे विमक्तीनी स्थाने श्रां मनवति ५१
॥१२८॥ इत्यालपा। श्रथानंतरं इति श्रेइहशी नाथमाला हंसे सति येम्यानुसीवान पनाश्च सरुचये। पनोपुः संगतावभूतु
कल्याणे भवतुतव कृते इत्युक्तामी प्रेषय इत्यप्युक्ता। वेगेन जगाम नलनगरीं॥ १२९ वेतानन्य॥ मनसिज
वाप्य कुसुमम ध्रुनिः सी मिश्री भवन्ना प्राणेश्वर हृतपङ्क्ति श्रेभ्रस्याया वाणीसे व हेषे गवीनं दुर्घदिन गोऽन्य —
सर्व्विः। नसाश्च स्वादः स्वांस्वादं स्वादं स्वाद्या स्वाद्या स्वाद्या। अत्यर्थं सुखाद्दुसुगेयं घतेः। राम्नि सादम यंती गतापितापं सीता
पेनआप। अविन्दश्रापमूर्छां विश्रानन्द्ययो। घतमधुममन्दरोण तापमूर्छा भवनी तियुक्तो॥ १३०॥ तस्यादृशा॥ ते॥

नातिस्म। अनावरणपतत्रत्राणि कनं ग्रीष्मसंशोषितसरोवनकमलं हसतीतियोजना॥ ९ मदना। नैष्याः
हृदयेन यतउत्पतितं। कामसंज्वरयुक्त तयास्फुटितं वा। निरंतरस्फुलस्तनद्वयपयत्रणा प्रतिबंधं कुर्वंती
तं अपुना घंह्रतवतीदयातेति वा॥ १० निविशतो। कंटकाग्रं यादि प्रविशति वनलोकियनी द्यथीनकशाति
। ग्रदुतनोः पुनः हृदि अवनिभृतनाजा पर्यंतस्थ। प्रविश्यस्थितः। अतस्तांद्यर्थां कथं न विस्तानयतु। अ
विवृतनोत। सूक्ष्मशिरामात्रवरणप्रवेशेनादृकुडः खं भवति। हृदिपर्यंतप्रवेशे किंवनलवनि इति भावः
॥ ११ मनसि॥ हृदिस्थितमिव। इवउत्प्रेक्षायां। प्रष्टुः सहृदयात्र प्यंतरंगतयानिवानेत्र्योः एतदीययाः
अतएव सम्मुखस्थितेनापि वस्तुनिर्गहणशक्तिर्न दृष्ट॥ १२॥ हृदिदम॥ अक्षप्रवाहपूर्णे हृदि विनहस्तनीत
नम्रतयाहेतनाः प्रतिविंवितमुखं शुभ्रं। किलोत्प्रेक्षायां दमयंती मुखं हृदिस्थितेन नलं वुंवितं। चुवनं
दानुउपत्यगत्वा आगमिश्रागती। अपथा न विद्यति गम्या इयः आगमित्रागतीन विद्यति॥ १३ सुहृद।
स्वासितेनगर्भ वहनस्वासरूपेण वायुना। वहिर्निःसरणात् अनुमितस्य न प्रवेशमापितं कापटिक
वैश्य कलितज्ञानं। किमर्थं प्रविशतीत्याह। मित्रं स्मरं दमयंत्याः हरिउद्दे चयितुं छन्ने जायितुं। यदिन श्री

१०स

नः प्रविशः कथं तिष्ठति दृश्यते कोऽप्यद्भुतमात्मानं दर्शयति लोकानां । वितानहृन यावत्सामाधिक्यं ज्ञानमिति तद्योगः ॥ १४ ॥
ये नहि । नयागत्वां दुर्लभं यस्य नागः पराक्रिविशेषः । यत्र तन्मः सेव मणी कालिमा यत्र तत्स्यानिजपानि भवति
ने कृत्वा । स्वल्पत्वेन कोऽराधादिरां ने मी दृग्वलिपि कानी नलप्रनिकद्द कविचित्रितास्वकान । चित्रमपिद
हुवर्णनविचित्रकत्रः कमानि । पतेनन्नावना वरानसर्वत्रनलं पश्यतानिनावः ॥ १५ ॥ स्मनकृत्वा । हृद
यस्य विचित्रस्य कामान्यादिनां अवस्था बहुकथयन्ति वक्त्रदः । लियेहृदयासितेन वस्त्रे मुकुः वानीवानि
५८ कंपं व्यावितनकं पंहृतनयानुनिः स्वामवानः । उपपादकमारु । आस्यपीडायां सत्यां कोऽनविनेति ५८
त्रपितु सर्वपवत्रसति ॥ १६ ॥ कनपद्मानेत्राः कनककमलवनण कमलनयनकमलनामभिः ॥
बहुनविनेजः चित्रकालंपीनतवर्यपानी । नूनपूर्वपनटा । अहर्निशनापव्याजान । विनहृद्धेस
तिउदसृज्यनउत्सृज्यं प्रकाशनमित्यर्थः । अन्यापि बहुपानं वमति ॥ १७ ॥ उदयतिस्मान स्पोनाम
भूपतिनूजायां वाप्यनितीजणान अप्सुदर्शनात । सरवाणिः अनुमितः सीतापकामानलः प
ननव्यतिवधानणव्यपितवितः । नत्प्रमेयमद्गुनम पूर्वमुदयतिस्म । पर्वतनूमो भूमानास नू

पस्य वाब्ददर्शनाय दग्निर्नैव्याशिघनतिनत आश्चर्यं जनयमि। अस्तु दर्शनाननलंजनितं दुःखमिल
नुमितिः सखी भीउदेगिह्न बिलावः ॥१८॥ हृदि विदा। नैम्याः हृदि शवैः वहनन वहावं कुर्वन्
कामः नलनिमित्तेकृतः नदन्तीगस्यते मा विवस्थित स्य स्य स्य आत्मेना दृढो व्यथ स्ता उनं येन स
पर्वसूतः। अनपवफलदनी निः श्रात्नसर्थीकामः। मूर्छाजन्मा। मा। अथवत्तु अर्पगतः। नलकामा ह
दिनैम्याः। नत्र नलार्थे ब्रूहवण आत्मानं विघाय। कृतदन्तरे तिनकूद्द्वन नलस्य दन्तगेन मात्मानं
विव्याधनिकेविनखलूत्वेन्जे ॥१९॥ विधुरमा। नैम्या यदि माहाने विधुः सूर्यं दृतिखीकृतः। त
थानहृदयैकधूमग्रा ज्वलन्न ददाश्याहा नोपिनेदाहाज्जावा ननलोकोपिने वह्नौ दाहादसः।
सूर्येण नकेनैदाह योग्यता पर्यन्तं आनीतापि तां नमन बनि सन्ताप मिति भावः। वियोगजन्या स्फुटना
न प्रकाशित पापाणलेस्थैन्व मपि दृषद् शम्दः सूर्यकान्तपरः सवपापाणान्तेनादृढोपि ॥२०॥ हृ
दया। वियोगानिमग्नया। नैम्या हृदयदन्तकमलया। सदृकमदसी कुतोऽवतिनस्फुटमपि तुनकुर्व
वो। अथवा क्षालुकान्ति समयेऽस्तु नकस्मिन्। किमितिन सम न वतीत्याह। सा किं कामयन्तु

आलिंग्य अनुमन्तुं सिनाभोरापितरापितवती यन स्तुल्यानवक्तु। यद्याकास्तु कुत्र देशेनवतुम पितृकुत्रा

पि। कामवधूवनयासमा स्वद्रूत्यार्थिकाह। साकिं विनायामशेनयतः समास्तु हृनिनिनाकेनोति॥२१॥

अनलज्ञा॥ सानैमी स्वस्य विरहस्य अनलनावैवद्विर्वैनशासात् नजानाति स्मेत्यर्थः। यत्र यस्मान्न

त्र पिन हृदीष्ठे प्राणान् हृत्ला निष्कत्वार्उपपद्य साधैं त्यक्तु मनिलिसि वती॥ अथवा अनलज्ञा वैनैष वस्य अ

 त्रिस्तूपर्वै नज्ञातवती अपितु जानाति॥ कुतएवमित्यार्थिकाह। यतः प्राणान् हृत्येव न हत्वान स्वयनां

यत्यन्तुमियेष। नहि विरहे मननीमम स्नेयः नजीवनमिति ध्वनिः॥२२॥ प्रकृतिः॥ हृदयैकोमलीं इति

यत्र योषितीनामवत्वेन प्रसिद्धा कया प्रकृतिः स्वगुणैः स्वभाविकैः मै भोकथनिसमन्त्वेतु। यतः सापि ये

पि तन्मेनपतदेवप्रमेयी यतो विवृधेन पीडितेनदेवेनवा कामेन कुसमबाणैः विध्वु न्वना पीडयता प्रक

टितैव॥२२॥ त्रिपुरवधा॥ भूत्पत्रयतुः वैदद्दीप्तिर्विविहितया। गृहादनि [illegible] नाभीनै मीलन्कलायतुं न

पोलरूपसनागवालेनै सै: तु उत्से ज्ञो विशेषः अविधवा। विशर्दंडायमानाः स्मयोगवालेविशे

यतः। किमित्यपद्धाने विशीतीत्यत आह। हृतवशेति अन्यथा अमलनिबद्धैकयति। विनहित्या

विश्वावानलं ॥२४॥ हृदि विद्धा ॥ नेम्या हृदि अश्रुसहितेन मुखदृग्गोक्षेन मदुःखेन निश्वासः। प्रतिविंबितो। कामे
न तदुपमाकुसुमानि आत्मबाणाः समस्ताः निरवशेषाः। खचूस्मेतो ॥ अशोकोपमा वीभूक कुसुमे मुखाकेो
खकमशोन स्वपयून यावच्चीन मुखकमलादि प्रतिविंबे उन्मेषोनिश्वासः ॥२५॥ विरहा ॥ विरहपीडिमा
माहिन कपोले प्रतिफलितः वीड्राः अतोयेय सुन्मीयुनया ॥ वनाहिनया पीडुनामुखस्पर्वैदेवस्वा ॥ विकौ
व अनन्तरितवलीस्य अदर्शीनेडु गेदुग्वजोपन्यायेना ॥ अतोऽक मृगाक्षी पादिति मुन्धे ॥ कलोके प्रतिविंविनी
मुखेदृपते अतो नेम्या मुखविंदुः। स्वसस्वं वकानादूयक्कालं अनिका नेवैं कमासीदिदाशी नुवेदृसदृ
बीयानमित्यर्थः ॥२६॥ विरहा ॥ वियोगथीन प्रेराग्नीये। हविर्वदनबूलिनिः विरहतापान बूलिनबी
कृतयुचालीका ॥ सविलिसृणाला नचपासनीका मं प्रतितिलोव ननयान कल्वे धारयामास ॥२७॥
विनिहिनी ॥ नयाहृदिवंदनं घृनं कृतनवुदूदं युयुजे ॥ किमिवेत्यत आह ॥ नेम्याश्विनअं मिवं उपगा
कृतसंवदनक्रोडस्थितेन नजत्रपवित्रानखं दृदृवा ॥२८॥ स्मरा ॥ वकृतनीमुकुः वानीवानं नूतनं ककली
।रसपितुमद्धिमागिमाहृनी सनी ॥ कृतपवेत्यत आह ॥ नेम्याका माग्निसीतनवनया स्वासवात्पा कृतम
मीनीयुष्मस्तः अनित्यन्ते ॥२९॥ वियकनानवकुचयुगलीके किंतामपातिकिमिनिम्ना नियानि ॥

३०स

ज्ञातचित्रं ५

किमितिनयाचित्वारीकाचः। प्रियकान्यहर्णपूर्वमनेन चकोरेण प्राप्स्यामि। हृदानिहितो नामतसमू
पुरुस्तनो दूनिकथयामासत्तु निवदाहत्तु कुलनेनकृत्वानुविनर्दे॥ २०॥ त्वदितनो॥ त्वदन्यः पतिर्मे य
हृदयेपिन कृतः। नती वित्तस्थीकामाग्नो त्वयुहती वोघयतीवा॥ वियोगपीडितया॥ अन्यापि अग्नौ प्र
विश्य युद्धः नी वाचयति प्रविसायमान्यापीड्यते वनि॥ २१॥ विनहुन॥ वियोगसंतप्तनंदगानिर्दे दि
५६ नापहिनी॥ संकुचत्यत्र मुक्षितिः कृत्वा तस्याः सीतापंपृथुं अपने नैकिंपेहन किंवा पत्रान विद्वैजेत
वा॥ उत्प्रेक्षा॥ मुक्ताफलिकि॥ मपि जीयते॥ २२॥ दूरमती॥ नैमौ कामवाणा वनिसर्पंजो निषसानिवि
ना॥ अवरा॥ चंद्रकलेव सूर्यो सुतन्वा कत्रुणसमुत्के कैंपुत्रुणेन विज्ञेपा सर्वे नां थो वनीत्यर्थः॥ २३॥ ५६
ज्वलति॥ कामदुःखेनज्वल — निहृदया सनस सुणालूलना॥ समीपस्थयाः आलिजायिताः न
हुयमाः लक्ष्येव मालिन्यमनजना॥ स्वरामत्यर्थे देवत्सु अज्ञायी॥ २४॥ पि — का॥ कोकिलयाम
त्ववाण कंपितेन याहृदि न्निप्रीवकुसेवालीवलनयुं युत्तो॥ सर्वदा हन्तावासः कामं सनसीति मी॥
तस्य धनजमत्स्यः तत्रैव --- जानि स्वभावानत्यत्यर्थेन तु घे षे लीयेवलेकतो॥ २५॥॥
नखलु॥ मोहवशेन॥ कामोन्मादायन्त्या॥ नै मासु रवैदवं न न मणीया॥ अपूर्वचक्रान्तः मनि

विशेषवशेन समनाः कष्टा। खलु नैव खलु एवं अर्थे। अकल्पयत्। अबुद्ध। अन्यथा ईन्द्रोदये कथं अश्रमयं जलम
त्यजत। खलूत्वेहेतु निवा॥३६ नतिपतेः॥ कामदेवस्य विजयाय वाणैः यथा जयति जयो कर्षेणवर्तते तथा
न्यविवाणसाम्यं नेम्याः अत एव यथैव तयापि वसंख्याव्यपदेशेन अयमर्थः स्तनुनायोजयित्वा कामो नेमीं अवेक्षि
तेतिश्य दृढलः॥३७ शशिमयं॥ इदानीं विरहाग्निकांपर्यायो क्याकथयति। चंद्रसूर्याग्निमयास्त्रत्रयं कामस्य
स्य ज्ञात्वा विरहिणी। अश्रुव्याजात् उचितं प्रत्यर्पं जग्राह। उदितं उज्ज्वलं वाणः॥३८ अतनुना। कामेनानाइस
नवं मेघं अंबुदं अम्बुं निनीतं। सा स्तनतुः दीर्घनिःश्वासव्याजात् प्रत्यर्पं पवनास्त्रं विरूप॥३९ नतिपतिः॥ वौ काम
निहितवायव्यास्त्रं तां सा सुदती नेमी मलयवातेजा नती। कामसंतापमयं स्वहीनं मृणालनरूपं इयं नेमी तु जंशास्त्रीज
याहृ॥४० न्यविश॥ नेम्याः यदि। विरहिनां तथापि विनिरुस स्यपिजी विनिं एनद्र्थशल्यं न्यधित आनो पिती। इत्व
वितर्कः। किमथ तत्र हृदि कामस्तन विश्वद्वयेन ततशल्यं निहत्य निरवात वाश। अन्यात्रापि कोपि विशल्यं निक्षिपल्लो
हादिविंडेन दृढ्वा निखनोति निर्मग्नं करोतीत्यर्थः॥४१ अतिशय॥ अन्यथैशनव्यं नस्यं कुर्वनाने मीसमस्तसहस्र कुसुम
मयानि निजवाणव्ययाः। पुष्पाभावे कुसुमनिकटफलमिति फलान्यपि विरूपणः स्तनतालद्वयार्पणासना। सर्वे वा

यत्राणां कुसुमसंवेष्टितयामप्युपयोगस्यालस्यतन्त्रास्ति । अतस्तालफलान्येव विरूपः ॥ ४२ अथमुकुः । नयावा
नीवानीवक्रुनिर्दितवं प्रयासुतविष्णुं नुस्या स्मरसंतापरूपे रोगे पतितया नेम्या तस्या एवङः स्वादकस्तसहितमु
खीसखीउक्ता ॥ ४३ ननसुया ॥ मत्तुष्यदेवाः एकोनवानामिवयथायस्य अज्ञाया वतायावसंख्याकेनयस्ययुगी
नत्रश्रान्तिः श्वाञ्चेकथितो । तथाविरहिणामवेदिकिमितिनत्यकथि । संयुक्तमिथुनरूपेणनयनिमित्तं ॥ ४४ ऊनुनयता ॥
दरुदुहिता उन्मजया हृदिमा ऊर्गोहृकामसीतप्रासती । नत्तु तन्मरुवादना । त्रिलोकुनललाटे गौनीविनहए
५७ कलतिनलयतं । उत्स्येकाध्वनिः ॥ ४५ दहन ॥ दहनसंजातादारुव्यथानसशुः विनहजेवमहती । यदिनहर्षीक ५७
थमन्यथा दहनं ज्योतिषः गतजीविते प्रियांसे विष्णुं विशंति उत्सुनाः उत्सुकाः ॥ ४६ पंडितगोविंदकृतिः ॥ हृदिपु
नरपिप्रलापैविनहादच्छि । कलाः विरहिणीवभकर्दमकलंकिताः । हृदहताः । कुमुदसंगिन्यस्तवाहिश्वेताः ॥ अतए
वदुर्विनीततरां पश्यचंद्रस्यास्यान्योपि पतितं स्त्री करोतिनद्धंनिराकरोतिसदुर्विनीतो नवति ॥ ४७ अपि विष्णुं च
पिसमुद्रयेदारुस्थूलदार्दृष्टं ऊर्ध्वाशिशिनो । द्युतिवंडपरिख । वपादेजङ्गानीकृतशं सुकं गरविणाङ्किंवावउद
नलात्र । विद्युत्त्या स्मासेजडेतिसंबोधनंयुक्तं ॥ ४८ अय ॥ अयंचंद्रः दिवः स्वर्गादाकाशाद्वाविनहिलीव प्रान्तके । अ

मणामवाप्यापात्यते कृच्छ्रनिशापालात्। स्फुटमुत्प्रेक्षा। हेतुगर्भमाह। प्रथमं स्फुटरूपस्वार्द्रनक्षत्र तयः कणोग
णः क्षोदसमूहः। तेन च धिकमत्यर्थं तारकितं गगनं येन सः। तारकादिदर्शनादिव। कृष्णपक्षे वक्रनार
कतया उत्प्रेक्षेति। अन्योपि पापैः स्वर्गान्निपात्यते॥४९ वम। हे सखि चंद्रमघवने नर्च इंवद। इदमीदृक् प्रस्तावादनि
न्दितामित्यर्थः। किं वाच्यते। हृद्यत्वाद्यथा स्यादेवं पनान्नवे छा। क्रियतेइदं मद्वचनं श्रुधिः तनान्नवार्थे पिदृत्यपि
कश्चिद्विपश्चिश। पतापकान्त्या गजन्माद्युत्कर्षे हेतुमाह। पयोनिधौ रत्नाकरे सति कुलीने लक्ष्म्यादिपित्र्वार
जनित्रोलोविनायादितदा महादेवमस्तकस्थिति स्थानमापि किं विस्मृतौ॥५० निपतता॥ हे शशलांछन
निगाहिते निनावः। सप्रक्षेपतनामंदनेणापि नहूर्च्छितोसि। जलधौ स्थितस्य चं इस्यातिपानेद्युमतो अतः पीतपयो
निधेः मुनेनापि जठराग्नौ जीर्णतानिगतोसि॥५१ किमस्तु। प्राणैः गतैः प्रेमी मनः मयि निमज्जतु हे उडु अङ्ग इति
किं मन्यसे। मनस्त्वद्विलीयते इति शुद्धाशयाएवं [illegible] हृदि मा कुरु। ममतदर्थिका श्रुति नलमुखवं [illegible] वि
शिष्टपंडितः स्मरती निस्मरः। मेधावानयः पंडितो भवति सश्रुतेरन्यार्थताब्रूते। स्मर्यते इति स्मृति शिति स्मृति
कर्त्रीं वेदानुनुव्याख्या शावेवंघजाने स्मरशब्देना॥५२ मुखनय॥ हे मृगीगडुः खवनाद्दत्वे त्यजा। अपिन्निन्दायाी। कीर्ति [illegible]

नवघटदृहं सुखनयष्ठशाद्दिकानद्य। पितुः कुलं उद्धलं कुत्र। वधूवधपौत्रयं गृहाणा अन्योपि पुत्रमार्थेलाजेसति
दूतिसंधं करोति॥५३॥ निशि॥ हेवंद्र कपटसूर्यतां निशिमासेवस्व मावसीतापय। मां प्रति भ्रातुर्लाभ [illegible] माकु
र्वेतापयपापमामिति पाठः। अहं पुनः सूर्यं जिह्म। तदर्प्पेणां कपटसूर्यतीव तव अवलोकयिष्यामि प्रभाते।
॥५४॥ शशकलां॥ हे कलं कमयं का[illegible] नस्यरस अ छास्य द्र्द्दशमूतना एवं त्रपता नवआश्चर्यो नादिका
पनाशिनः केपनक [illegible] वम कानकारिनया। [illegible]यस्मा रम स्मा देवाश्रितोपि माद्दशीनां कृते नात्रौ कलाशि
५८ उत्तमसंगडः खद्दायि त्वमयुक्तं। भूनयनि[illegible] नः गगनाश्रितः इन्द्रिवा। अथवभूतो देवयोनिभेदा। अमृतस्यञ्ज ५८
प्रासमरणस्य एवं भूतना आश्चर्यजनिका। प्राप्तमरणस्येव नाश्चर्याय भवति। भूतोपि महादेवाश्रितो भवति आकाश
संचारी वा। सोपि स्त्रीबालादीनां भयदो भवति। ना[illegible]नि दीमो भवति। [illegible] गतिस्तस्य [illegible] वि [illegible] नमपि करोति।
अम्बुजाग्र दूति लोकः॥५५॥ श्रवणं॥ कर्ण्ये भूत्वा रूतं तमालपल्लवं देस[illegible] दकलं [illegible] निरिष्य। तत्र रूणि
च किमपि वृहत्कुक्षिः सद्यपि दिपिद्ब्राति नि[illegible]वातीर ध॥ तव मुहूर्त्तं सुखिनी स्यामित्यर्थः॥५६॥ असमये। अप्रा
स्तावे तु क्षितुदेति ध्रुवं निश्चितं हस्तं गतेव द्वयममावास्यागतो। पुनस्ते दागच्छति [illegible] तु यन्यते। सदा[illegible]प रू

त्वेस निपुनस्सेंद्रलोको न भवतीत्यर्थः ॥५७ अपि ॥ मैमेषवको न बालकः अगस्त्यस्य समुद्रापेयस्य शिष्यतीया
ति बाला भ्यासः । सम्यग्भवतीत्यर्थो । समुद्रं च क्रिडे कृतसम – स्पर्शं इव कनाः कति विंदवो भवन्ति ॥५८ कुतु ॥ हस्तोपक
ल्पोऽहमौ सुकृरं कुतु । इत्तो म के हाइवह्नि : दर्श्यणीन येहि मुक्तं तुं ने प्रतिर्विवेन घातय दाग्रविशति तदेव देस खि शर्त्रं
प्रयासेन शीघ्रं मानय ॥५९ उदया ॥ चेंद्रः समुद्रेण उठवएव किमिति नृनः विदु षो दुःस हां अथवडवाग्नि र्द्दनां तद्वयं द
यमपि कि । च हूला । अमुना समुद्रेण दुःसह चारत्य क्रन्दन् किमिति विषवतनमनाकृतवान् । अयं विषाद दुःसह इ
पित कृतवर्णितावुणइत्युक्तं भवति ॥६० असित ॥ कालकूटदाधिकं विषेः ददयति । असितं कृष्णं सामुद्रं विषं कालकू
टमित्यर्थः ॥ एक देवत्वं क्रिंतम पित्रुनं सौमूनतपुनः जन्मन लेनो एषवेंद्रः पुनः शुभ्रं विषं आसो वं । सर्वामत्रैः निःशेषं
एषा नवदत्येवं पीवा जनितसी रूयमपि पुनर्नूतनः स नुउ दति ॥६१ विरहि ॥ विपरीत मन्यथा कथयंतीति क र्त्येलत्यु
विपरीनाक घाये घामिनि वा तेकथं यरुविदः अपितुनकथमपि अथवा प्रहविद इति उपहासे । अशेषकले संपूर्णे
विरहिणीनीवर्गः समूह : तद्वधव्यसने आकुला कथं कनोमिकृ वा । अथवा व व्यसनेन अकुलः अविद्यमाने कुलीय
स्मात् कुपुत्रेण कुलं न सुमिति न्यायेना इद्दर्शं दं दृष्ट्वं तु मेवदंति । सुनेर्निपीतस्य बार्के द्रीति पापय इव दन्तात्र

एवते ग्रहविदोना। यद्याकथं त्र विपरीतकथास्ते त्र पि विपरीतकथाः। वंच हे सखि पूर्वं स्त्री वध्व कन्तोर्नेवापि
जानीहि। स्त्रीलां वचनहितं पुण्यं जानीहि। यद्या विरहिलोवधव्यसने आकुलः। कुब्ब हृदय स्त्रान्नि हत्वा र्थे पयङ्कः रे
न ड्ःखीति नावः। सुराणां मध्ये निपीतास्तु धामेनेति सुरोत्तमना। सुरैर्निपीतास्तु वाय स्युद्ङ्निपयो पहूति तया वाशु
न य रुतेति वाप्यारव्या॥ ६२ विरहि। न ङ्समाने अवापि र्लप्रितोयः अतएव वङ्कलाति आदन्ने अर्थात्र समान
मेवस वङ्कलाड्रनि। नै रेवा विरहिभिः तस्य वङ्कमानस्य त्रमिति न सैरव्याय त्र्यन्न विसानि थिः किममीकृता। मा
५९ नीमानविचने वङ्कमानस्य मापविमाणे यस्यां सारवन्नूत्ये रू॥ ६३ स्वरि॥ विछुवक्र वासनया। चनिप्रश्वासो
नी कूसुदर्शनस्येति कर्म यादयोवा। त्रमा - भानेः। वंदीनाङ्ःखादति। यद्येवं नत्र न्यथाकथं वलि ददिराङ्कु ५९
पिं डनु ल्यवदनपतिनं त्यजति॥ ६४ वदना॥ वदनांतर्गतं खेछया स्यायत्या विधुंनाकु त्रे त्यजति। किंतु गलनाल
विलेनमहि तिरवगलति निःसनति अत्ययं विना विनाशं विना॥ ६५ अङ्ग॥ अङ्गदर्शिनः पुनाणाशः नायती
नाङ्कुशिनह्विदं वदेति। विरहि मस्तकछि दैनवदेति। तङ्गनाग्निखेश्चंडः क्रमवति। लविलैवविनएषा व्यापा
दिनाइत्य र्थः॥ ६६ स्मनसरवौ। दीमकामसरवौ देववैद्यौ कामानिणामहादेवेनाछिन्नं यज्ञमृगस्य शिरो।

यथासंदष्टः। लोकायमित्यैकामारिणा छिन्नमिति हृत्वासीदष्टः। अस्य च तथा विश्वामित्रे विनाहे सखि कः
संदष्टाश्चिति भावः॥ ६७ नला॥ नैषषच्छिन्नमस्तकस्य शत्रोमनणम्नीत्वा अत्यर्थमुत्पतनतः। राहुशिरः। तदस्य दृष्टवं
ष्वनीयथावं किंत्रमिलतीति॥ ६८ सखि॥ हे सखि जनानां परिघ्रुछ कबंधतां दधता केतुनापि समी मगधराजस्थानी नरखं
डवत्तराहुरस्तिनः किमिति नसीदति। जरासंधा हुसी विशेषः॥ ६९ वदवि॥ मज्ञाषितैः सखि राहुं वद द्विजरा
जद्विया विप्रश्रेष्ठबंधुध्याशङ्क्ते किं ताजसि। यदीदृशो ब्राह्मण एव न वा वातुलीनिषेव्यपातितः किं दिवं स्वर्गं
पुनर्नेति अपितु न वा तु लो यत्स्विमादिक्रमद्य विशेषस्वपतिनो भ्रष्टः महापानकीव॥ ७०॥ दहति॥ गरुडेन
यथा ब्राह्मणतुर्ध्या निषादलौ गतो विप्रस्यकण्ठं दहती ति हृत्वा। तथा त्वया विकिरत्यकः। अयी विप्रो न भ
वति किमितीत्याह। प्रकृतिः अस्मदाहिका। यद्येवं न तदा नि नागसि मयिका विप्रता॥ ७१ सका॥ द्विजरा
जतानाश्वास्य कथमित्याशङ्क्याप्युन्नाह। समस्तकलानां मेलकं कृत्वा यमार्थं सृष्टो यो विनिहृत्या वर्णणसाचनं।
अतः द्विजानीदं तानी नाजा द्विजराज इति श्रुतिः किंवदंती॥ ७२ स्मनमुखी। कामानननीद्दरलोचनायै
नारूपी विधिना। अनेन प्रकारेण विनिहृत्या वचेन श्मा शशाव्याजात्कालेन चिह्नितः। अन्योपि अपदिदि

लोकुर्हितिर्नयियेभ्कलोलित स्यातुरखवालितामवती निनावृ॥ ७३ इति॥ एवंवं ह्रस्पधिक्रानंकुवालिर हु ४ खंद घनीहत
लोक्य निरालकुत्वा इति स्द यसाजैगिनिब्रालितं सन्निहितमित्यर्थः॥ उपाल मतकासं॥ ७४ हृदया॥ मदीयं वित्तं वेदा श्र
यसत दाएवं प्रकाले गत दैवक्लिमिमिहा लयसि। रूलोमभस्मीकृतः निजएव श्रात्मेव ईवनेयेन। अतएव अश्र्य
शवान् ह नाशानिसु केव्यमव वान विनासि श्रा अयना शसतीत्यर्थः। हुताशनो पि ब्राधानीकृतदग्धं वनो नम
६० वनीति॥ ७५ पुनर्मिदा॥ महादेवन ब्रूदृश्यतपापितोसि श्रात्मत्रिनयनव नाशानयात्र। हेस्मनत्वयिप्राप्तिगते ६०
हृष्ट्वा निपरू कस्य वनापिचित्रिः नवैः ननिर्रूतमनिः सन्निधतश्र पितुसर्वस्यापीत्यर्थः॥ हे निर्प्रकृतार्थो
कथयतइनिवालोकनाबाउद्यमवलो क्यवक्लि एनं दृष्ट्वा त्रिनेत्रो ईजातः। जगनिसर्वेचिन त्रान विद्धीती तिक्ष
त्वाम हदयमयः अह्निगतोहंसः इति कावृ॥ ७६ सहवनो॥ सरुवनो वी तति सहितं ४ सदेति भूयन। वायव
सतिसतिमायममना - कृतोनास्ति। अथमेलकं युवयोर्न्नास्ति किमितीत्याह। किल भासि त्रोनवं तीना नुस्मृना
सायत ४॥ ७७ इति वि॥ रूनति वि युक्ता अतएवश्च नात्म यनज्ञा मा मिव आत्मानं यतस्तापि तवानसि आत्मानं पर्वव
यान जानासि सः॥ अरुम नम इत्यतश्चाह। यदि त्वमतमः तवर्सगा वृक धर्मेषि तं दृष्ट्वा ततस्य शोद्दा हायुज्यते॥ ७८

अनुमा॥ सा अनिंद्य सिद्धान्तध्यासाधीनतिः कथं नाम मनएीचकार। उवितर्कौ॥ प्रियतमयापितया श्रीवत्सकंत्रेतिकृ
त्वा किं परित्यक्तो सि नापतितः सर्वैः त्यज्यते यतः॥ ७९ सुगत॥ लौं विजित्य सुगतो बुद्धः स एव दातकीर्तिशनीन अनाश
यत्र। यशो नाशान्तकं कृतौ पृथिव्यादिभूतनवितानं न्त्र युद्धहरो जहान॥ ८० फलम॥ महादेवे विनिघ्नता याप्यादयत
रु अनीगयतकाय नाशरूपं सफलममलभ्यता तत आमध्यजातनीतिः। अरुदवितर्के विस्मयवानीतिनापि कुसुमे।
यऽहुं नेच्छति। बुद्धो न पिनयोद्धर्या किं पुनर्निशितैः शरैरिति॥ ८१ अथ॥ इतरदेववरा अमृतं नयन पवित्र चिनेत्रा स्मृति
रूपादिशोकथं प्राप्तवानसि। खलु निस्सयेन। रतः अधनरसंवादादनाऊ। सुवीस घ्नता नादिवैनपी तयान स्मिहृति
नत॥ ८२ भुवन॥ हे स्मरपवने। प्रातमनएत्रैलोक्य संमोहनसंज्ञाने नपापेन तव विशावना। कथमेवमित्याह। यत वि
रहमलिनां मादृशीं परानवनत्रास्यसि। विशाखेपिमलिनीं पनिवनं भ्रमति॥ ८३ वाद॥ तंतरवदे। शरैः हसि मनाएी॥
वनददासि यो मार्यते तस्य कि पया बनः पतन्ति हस्ता इनदपि न भवति तेष्टेनास्मीतिरूचा रूपा एतत आरु। अथ यस्म
ता सितर्हि युक्तौ। श्रीकृत दंठदं बनो युक्तिः मृतेनन तत्फले। मडउठि ड निल्ला क प्रसिद्धि॥ ८४ पं श्रीगोविंददेवकृतनिनि
धे। ८५॥ द्रुपद। वक्तुं नाग्रं अग्रमर्त्युं वे रूपं च अन्यदेवसेवितं स बानाहः यति। अतिशयेन अं वता शनानना शखपोतुतार

हस्यन नवस्नेवकस्य नवति ॥ ८५ स्मरनि ॥ हेकामन्नमतिशयेन पापिमः । अनो विधिः तवायुवं पुष्पाणि नवि
तवारय । दिदृढं धनुः सौहारवाणा नस्हजेततदा त्रिलोकीनाथीभ्रमेत ॥ ८६ स्मरस्वि ॥ यथा सर्वम महादेवस्यावा-
णोग्निः त्रिपुरनगरातिदाह तथा तवापि वाणाग्निः जगतीत्रयं मादहतु । इतिकृत्वा किंविवितानि हैतोर्हितो अस्तु
क्तिनः । तथाणकुसुमानि मध्यम भूमिन सिंचन । कुसुमेम भुयोगिवेइयमुत्पेरूा ॥ ८७ विधिन ॥ असामनुष्याणा-
मनो निवेश निनवयवं अनएवा[illegible] । आवानवशनवील दूमकनोहू । खलुनिश्चिन । अपिसंभावनायो । वइंवेदषा
६१ स्यतवयाणेस्न दपिद्विधा नविघ्नरः ॥ ८८ अपिविधि ॥ अष्पातितवबाणान् विनायघातासुरवं न प्राप । हेस्मर । अपिसं ६१
भावनायां पश्चाद्रनिटा मंकृत्वाप्येवसंख्याकान् तान् वाणान् ददौ । तथापि नैनेववतरवे देहगतरवडिते ॥ ८९ उपहर्ता ॥
देववृक्षाः कस्य देवस्य कृते । कतिसुमनसानो पहरंति अपि तु वह्न नर्वदि[illegible]नि । नवधुनहीनतया हृष्येग किकीप्रत्ये
कमेकेकीदृदती त्यर्थः । चिकुगर्हितेइयतापि एतावनापि नांगविधानरी । नगर्घेत्यागः । तथापि गर्हीमयाइत्यर्थ अ-
लोकत्रायेयी ॥ ९० कुसुम ॥ कुसुममपि अनिपापकारि धनुर्वाविद्धिः पुनः - - - यारुदवागहीनेत्यर्थः । एवविधे
धाताकिमकृतकिं कृतवान् । तवएकस्य तस्य अस्य देएकधनुः स्थान इत्यर्थः । इदानीनलघुवोधनुर्धये मकृत ॥ ९१ ॥

घद्दता॥एकवारंविकाशितनंदनाःघद्दतव४ आत्मीयमेकमर्कं तु पथ्यं ददति। अनुकंपया भक्त्या प्रीत्या वात्सवेन
एवंता।निघद्दभवंति इत्याशाहाव॥ तैःधनुःशरां सर्वं कुड्बे॥८२ घदलतुः॥ यतत्वमनंगः एतद्देवसं सारस्य दिनं। कुत्र
सन्तु निः यः तव घातं सहतो अविवलं बुद्धिं न यथा भवति एवं इत्थं माकल्पे मा कुथ्य वेत्यर्के शक्तो वि॥८३ सहतयाः। हे॥
श्मनः शीं नु प्रतियेशनं वं हृदीनवानसि ते न शक्ता। सहद्वे यगिनिकालि चा अस्मात् हः॥ भुवमुत्पुन्के इदानीं मशबीस्व
नेपंचमसीख्या। हनको वाण४ तथ कोकिलस्य नएव पंचमो भूर। अथवछलतः पंचमस्वरं नो निर्विकथ॥७४ समन
समा॥ महादेवस्यापि तवदा हश्रमा ममाघर्म्मे नफलीकृतइतिसंभावयामि। मदेवका यार्थंत्यक्ता त्मत तनु४
डुनस्तदेवस्वर्गे न अप्राप्तवानसि॥७५ विनिहितो॥ वियोगिनो विमुखस्य दुःखितस्याचं प्रोदयं। यमदिज्जातोव
युः नदक्षिणो नानुकूलः दुःखदवार। दर्शनार्थं विहृदये विमुखस्य पश्चिमानि सुखीभूतस्त्रिनस्य
घुतुबस्य दक्षिणवायुः दक्षिण भागस्थानं भवति। कंठवाम भागस्थो भवति। दुष्यस्य घ तुः अटनो धनुः कोटेनमयनम
नमयितुं वा न बवा कुर्याद् दक्षिणा अनुकूलत४ विपरीतलक्षणा वा का कुर्बो। अथवमारणाय संमुखस्य दक्षि
णानागो अभिमुखस्य सुमनस४ श्रुनस्य वामो भवति॥७६ किंतु॥ भगवाञ्जवानीपतिःसं भवीते एककं मदसुदीर्घ

स

६२ धिनहिजनांतर्कयुक्तिनवान।ततोहृतोः किंमुग्नीय॰ति सुकथ्यते। सपनमेस्व॥ वकूथादेवम - नाजिन्।मदसु ६२
दादर्पहर्षणां वंकनोपितिश्च तस्वकूयादेवर्चे वकजिनु। श्चेवयती त्यंयक॥ द्वे पुनर्वियोपिगिजनां तक॥ श्र
तस्वकूयादेवनामत्रयंजानीमदनजितश्चं ववाजितमृत्युजिदिति॥ ९७ व मिव। नवन्नमिवपनोपकानेपेडितः।
हस्मरकोपिनदृष्टः नचवाश्रुतः। कथंज्ञातमित्याह। यस्त्वंदहनादग्नेः स्वमात्मानमदह॥ दग्धवानसि। प्र
योजनामाह। हलतात्मनाहृत्वाउगंनि श्रालिंग्यहृलाघिते॥ ९८ त्वमुचितं॥ महादेवनेननयनाग्ने।
त्वंलोकशास्त्रिकहोमहविः कृतो सिदूदमुचितंकृतंदैने। तवसखायं मधुं वसंतं विहाय देत्याविशेषं मधुं
व्यापादयता। वतखेदे। हरिणा किंकृतं कुत्सितंकृतं। अथवा किंकृतं अपितु किमपिन॥ ९९ इतिकि
या॥ तस्या॥ नेम्या॥ इतिश्चनेनाकारेण वियद्भवनेनैव तदात कालमुखेपांशुलंकृष्कज्ञातं। प्रियावनपि
वासु। अन्योपि पिपासया पांशुल गतो भवति। अत्रोत्तरं। अप्रियवचनकलकाय कोंकृते रिवा॥१००
प्रियसखी॥ सखीसम्हृहनसहम्र्द्दं तणित्या सा नेमी नियैवखयनः। हृदयकामवाणेरत्तार्थं विद्धाया।
पादिताया। अतावकु - - - - नार्था। अर्द्धंतयोक्त अर्द्धसखीनि रित्यर्थः॥१०१ अकत्रुणा रा कुसुमवा

णानु निः कतुणोन्न आत्मन ४ अस्मनु प्राणोन्न अवरकु। आपदिस्यामा विकयाचीरत याकुवा उत्तरमाह। प्राणा
एवमवेशिण ४ तानवरद्विउ किं आव्ह किं ब्रवीषि प्राणापगमे सनिाडःखं ननवत्तीत्यर्थः॥ १०२ हिनगिरी। हिनी
वरनें कि मितिन रात्नणा वि। हे आश्रवेववन कारिणि स्वकीयें जीवनी दत्यदपिरक्षा। सखि इदृशी नवतीयदि
हिनामम। याचेममशत्रुं जीवितमम्निलषसि॥ १०३ अमृत॥ देने मिएघअमृनकारः अस्यकते। किमिनिसिजा
सि। हे सखिअन एवनप्यते। घघस्यक वा ४ मृतान्नवीतिनदाकपरिनप्यते। अपितुनका पि॥ १०४ व्रजइति। इति
नऊ। कारणशून्यांनीतिंत्यज। अयीशी नदीघितित्रुदेति। निश्चितमानपशुर्मुनैः कनीकां घाम्निमि: ह्नलयतिभ
हेसखि अनुमदें वचनमात्रेणेवन्यकरो नि॥ १०५ अविशेषे॥ आविभूर्त्तै हेसमुत्रये हेसखितवहृदयशपथैं कना
मि। यद्दिवं द्रदीप्तिगा वनोनमवसि। उत्तनमाह। हेसखितुविफलप्रीतिफलैंलै - - - - - - - - यदयीं हृत्नय
नित्वं चं प्राणांस्वउत्तलयनिउद्विपनि॥ १०६ विधुविरा॥ चंद्र लिनाघिति घरम्निवायिनीसंभाषणकर्त्री को।
कि कौत्नी किमितिनहन्त मि। हे सखिकुहूकुहूइत्यर्थपर्यालोचनयाकिं। सर्यकोकिलाश्चन पैर्थमयीवा
णीमयि विघयेकिनतिा एकत्रडःखमयींरपनत्रात्यी॥ १०७ हृदया॥ चित्रे एवतवमप्रियनमोवत्रैनतथापि

किं दुःखिता भवसि। हृद्यपि च परं स वल्लभो यतः यस्मात् खलु निश्चयेन वदिन्नेव त्रेतनेन तत एव तस्मादेव मा
या विखिद्यते हे सखि॥ १०८ स्फुटति॥ हारमणोकामा भिना स्फुटति सति हृदयमपि अलंकाररहितं जा
तं। अथ वक्ष्ये नवक्विनलरहितं कृतं। हे सखि संप्रति हतास्मि यदि चित्रादपि अपाकृतः स नलः प्रिया मम
श्लोकरष्टा भिरर्द्ध समस्या॥ १०९ इदमुदी॥ माइदमुक्तामूर्छायियो। मनसि वर्द्धितकामाग्निः। समवलंबनलेशच्छिदी।
अन्तपत्रिसहितामपि। इयमपि भूयमपि दुःखिता महती चपित्वन काऽपि॥ ११० अचिन॥ कापि सखी मुखजलं आ
चितधानयामास। कापि भ्रुवो नलिनीपत्रैः प्राधितविहितवती। बल्लिना गुरितेलोप्यपति अकारलोपप्रचितेनेति नवनि
कापि भजला निलं चकार। कापि हिमशीतलवस्त्रं तस्याः शनीवेति न्यूप॥ १११ उपचारा॥ सखीसमूहस्य ताउपचारा
कामलशीतलेङ्गे लजादिपि॥ तेषां यथेर्थं लघु स्वल्पं दुतं यथा भवत्येवं वाचेतनी प्राप्येप॥ ११२॥ अथ कल॥
हे कलः सखि कलय जानीहि स्फुटं श्वसिति। हे चलेप स्पवलति। हे मेनके अ बरकंपनं जानीहि। हे कल्पलते॥
किमपि वक्ति शृणु॥ ११३ नजय॥ हे चातुमतिस्मनाव नयनिचय। हे केशिनि केश्यं केशसमूहः। असीयते अस्वि
णयसंवर्द्धं कुरु। हे तन्वी गिणि नेत्रयो। जलप्रवाहान अवरहाण अपाकुरु। इति गदाः सखीनां श्रुताः। नेमीसखीनां कि

सामनकाकल्पलतादिनाम॥ युग्मं॥ ११४ कलकलः॥ श्रीघ्रुवचैनेस्सखीसुखात्महान्कोलाहलः उल्लासाउ
त्सामनकाकल्पलतादिनाम॥ ११५ कन्यांतः॥ शचिवश्रेमोवेद्यश्रेमस्वस्त्रत्यमे
नःमदा। यांशद्दश्रवासत्रीमनरंभः दत्तन्नयःसुनाम्प्टहसमाडणाम॥ यथानयी कारात्। कान्यान्तः सदननाशाय दोषाश्च नजाताश्च इत्यथ्याहारः। एकत्रदोबाः घ
कदवतोद्दोना जनमूसत्त॥ किंत्र चतुरित्याह। हृनपतेश्रकार्यं। श्रद्दं अखिलं समस्तं ज्ञानं सुश्रुतेनसम्यक्श्र
विचाराश्च वैद्यपदेशोपानामः॥ किंत्र चतुरित्याह। हृनपतेश्रा कार्यं यात्रि दं अखिलं समस्तं ज्ञान सुश्रुतेनसम्यक्श्र
तेन चरकस्योक्तेन रुकृत्प्राप्तिविज्ञापितेन। अस्यास्त्रेम्नीमस्याः नलदं विनानेषधंघ दं विना संतापस्य नाशने को
पिनयकः स्यात्। प्रियमवैपाहृदे वयंपुसुश्रुतेन वैद्यकशास्त्रेण चरकस्योक्ते न चिकित्साशास्त्रविशेषेणासमर्थो
ज्ञानेऽस्याश्च नलदमुसीनं विना तापदलनेन कोपिक्रमो भवति॥ ११६ मान्याम॥ अमात्यवैद्यान्यामेकसमयमा
त्रिधीयमानत्रेदाः घटत्वा तस्यचयपाकृतं निराकरणीयचतत्र। एवंभूतं मिथश्च अतिघातं परस्परं शब्दव्याघातं। नि
त्रहूपाणामेव शब्दानां एकदेवोक्तानां त्रयस्वर व्याघातो भवतिनतुएकरूपाक्रान्तिनाम्पीश्लेषेणाकवातं नेम्याः श्रमि
त्प्रशतसीकयाकिमपिनास्तानश्रुतमित्यर्थः॥ ११७ पुनविंग॥ श्री प्राणनीतवियोगविक्षीतनूजीवनणवंदार्तु नाजाकाम
वाणपीडानिपीडितोंज्ञानवान्। पेडिताःपनाशायशी घ्रणज्ञाननयः॥ ११८ वातनदा। इष्मितं गुणमयं दयितं स्वयंवरश्र

लपनहोभिः त्वं प्राप्नुहि इत्याशिषं तन्तुजायेलक्षानमशिरसे सुखमुत्तममप्यपि तादृदो ॥११९ तदनु ॥ सनाजातदने तवैनै
मीसखीः उक्तवानमभु समये प्राप्ते हि यस्मान्नृदृशीनो शरीरं कुसुममपि वाणायते । तस्मात्तदुचितं योग्यमुपवा
रं कुत्र नश्यस्याः नेष्याः ॥१२० कतिपय ॥ स्वल्पैरेव दिवसैः वा पुष्पाकिंवव स्ययायावनीयानुवनः कशिष्यते वरणीयः ॥
उक्तकर्मोक्तिः । तत्तस्याद नया दमयंत्या तव हि बानामुक्तिभिः उविः दोलिः । दृनिर्वा प्राप्नुयोग्या । कुशिमशमनं
या तियासा कृमेशिमशमनया । अथवा कुमिमशम स्वपशमंनयतीति पपाद्यत्व । पश्चादं वी अपादेश ७ स्त्रियामा
६४ दाइतितु विविशेषणी ॥१२१ एवं यद्य ॥ इति नाषमाणेन राज्ञा तनयाल ज्ञास्त्वानंनपृष्ठा । यद्यमोहः क्षामाङ्गा ६
तइतिकल्पितशानीरपां इत्यादिभिः कृत्वा । यस्य आशीः कपटात् । उक्ता । तथा शांवनावस्थानं । तरुण्वासखीरवी जा
नामनः समुद्रं हर्षलक्ष्याः विस्तारयामास । मंदा हं स्फीत्वपेत्यमरः ॥१२२ श्रीहर्षमित्याद्यर्धं पूर्ववत् । चतुः चतुर्थः
स्तैर्यविचारणप्रकरणं कुणनं गसिद्धान्तप्रकरणविशेषः । तस्य भ्रातरिसमानकर्तृकत्वात् । महाकाव्ये नैषधच
रिते सर्गः स्वनावसुंदना व्यागमत समाप्त इत्यर्थः ॥ छ ॥ विमलगुणशत वुचजनविहिन नावानुकृति चक्षुनतमी
चक्रे श्रीगोविंदः सुखकनद वायानिः सुनदी ॥ छ ॥ ॥ छ ॥ इति श्रीगोविंदमिश्रविरचितायां नैषधटिप्पणि

कायांवैदर्भीविप्रलंभोनाम चतुर्थः सर्गः समाप्तः॥४॥ ॥५॥यावदागत॥सद्वीपतिःस्वयंवरोत्सवाययाव
दागमयत्आनयति आकारयतीत्यर्थः॥ तावद्देवमार्गात्मुनिः इंद्रदर्शनेच्छुः नारदःययौ॥१॥नात्रचित्रं॥पर्वतोमुनि
वरःतस्यानुतस्य पश्चाद्ययतप्रययौ अत्रनचित्रं। सपर्वतःखल्लु यस्मात्तस्यमुनेःसपक्षोमित्रं। अथचपक्षरुस
हितामहीधरःयतप्रययौनात्रचित्रं इतिध्वनिः।नारदःपुनःउच्चैःअतिशयेन आश्चर्यजननाय वियतविल॥
संघोपद्वितो मित्रानुगोयास्ययौ। नारदश्चउगतोपिपूज्यः किमिति उगामेत्याश्चर्यं। अथचयोउगतोपि
गुरुःभारवान्सलंघयनृत्य द्रुतमुत्पादयतीतिध्वनिः॥२॥गच्छतापि॥ - धियापथिमार्गव्योमयानेविमाना
पिगच्छतागगनं विजगाहे विगाहितं। कथं विमानादिसाधनं विनाययावित्याह। साधकेउपकरणे अन्या
उनानां इतरजनानां नियमः। योगिनांतपसैव समस्तासिद्धिः। अन्यजनार्थमितिपाठ। अन्यजनार्थे साधकनि
यमःकृतःयोगिनोतुतपसैव॥३॥खंडित॥एषनारदःअलमत्यर्थं विमानानलंघनेस्मलंघयामास। अतिक्रम्य
ययो।अनादरत्वाभवा। खंडितैद्रवं द्रुनरुत्नानि दर्पाद्धा खंडनात्यत्तु यतया अतिदेदीप्यमानाद्येतयावायत्नातिजि
खरणवंशानुनिर्यातितो विश्वतिथिलितांना ज्ञुमेने नस्वीवकायांशीघ्रगत्यत्याशयः॥४॥तस्यतापन॥तस्यनारदस्यसंताप

नयाश्च सूर्यः स्वीजासीतावदेवसमेकावयत्र संकोचितवात्॥ यावदेष सूर्यस्तत्रेऽ सेव प्रतिदिनं सीतप्रः॥ उपमामाह
अक्राशशी वा सूर्यादपि ऋतुनिस्तऽस्वी अत एव ऋतुनिमेतापनत्रये तत्र थमं मयूखसंकोचं चकार यावन्मुनिना सानाप्तिभू
नऽनिजाव:॥५ पर्यभूत॥ यत्र सूर्यः हिमवाऽ ब्रह्मरश्मिभिः पर्यभूत। अरुहश्च आसर्य। तेन हेतुना खलु त्यह्न तदातम॥
स्मिन्कालस्तं न विहिमवाऽजोनारदः परिभूतवान्। कथमित्याह॥ अत्रसंसानेस्वकृतकर्म्मलोकोकानन्तुके आतिकुसवेषे
व॥६ विष्टरे॥ अस्मै अभ्यागताय गंगानदी गंगा। विष्टरं तट कुशापं क्रिभिः जलैः पाद्यअर्घ्यच कछत्रलाभिः दूर्वाभिः संक
मलसहसूहम ऋतुभिः मधुपर्कं च दितरदेो। विष्टरं कुशासनं॥७ सच्चतीत्य॥ सनारदः आकाशमर्थीअगाधम ६५
हप्राप्नाति। कल्याणेनेनेणनरमणीयां। ब्रह्मदृष्टहे ब्रह्ममपि॥८ अर्चनाभिः॥ तेनानारदेन इन्द्रः प्रजाभिः कृत्वा कवि
लायायावसाध्योक्षेत्रयहीनेषीः उद्दतना बहदृशी भिन्नेनाभिः। सदकृतनसत्कृतवान्। प्रजिनवा नित्यर्थः। कि
मितित्रैलोक्यराज्यपिष्ठितो निकुप्रजां चकारेत्याह। यावदर्हकरणं साधोऽभ्यकरणप्रत्यवाय छिद्रानगुणोयस॥
नामूर्ध्वपुण्यघाप्नये॥९॥ नामधेया॥ अदिभिर्वइन्द्रः अनेनाम्न सानेनसरवंनामा उत्पर्यवतमित्यर्थः। प्रतिनिर्याति

ज्येयतश्छन्दितयानित्यर्थः। किमिति शत्रुशङ्कितवानित्याह। सपक्षेतनामाद्विजः प्राप्तेन्दुः कथं नलमनी। अथ तत्पर्यंत
नाम्नाद्विजेन पक्षिणा खण्डितप्रभुलं निनाय वश्यं पूजा प्रापूर्व्वा॥ १०॥ तद्वजात्॥ तस्य बाहो सकासात् विहितप्रजन्मा शास
मुनिः कल्पद्रुमात् वदान्यान्॥ विबुधा स्वर्गसह निवाससिद्धिनयात्र व्यस्तया। दानपानमितयार्थ्य विशेषेण अ
थवा दानपानं इतरया गतया शोभनं शिरुया॥ ११॥ मुदिता॥ त्यक्तान्यलोकसंभाषणः स न बालानाप्तिः नारदमवोच
त्। सुहृदाः सहस्थितिः स्वपनवदुःप्रवृत्तीनामाकरः। उत्पत्तिकारणं हि यस्मात्॥ १२ तं कथ्य॥ तं शतमखः मनागमम
नकारणेत्युक्तु सुनवोचत्। हन्त मन्मथ ध्यालापकौतुकितायां। कथानुकथनेन वाक्ये न प्रसक्तायां प्रवृद्धाम
या॥ १३ आगिवा॥ राजवंशाः यथापूर्वं तथा किं शत्रुतर्के वीरकनीनान्वीनप्रयोद्धा इनप्रसुवते वंशस्य कनीनेन्दुतेइ
ति ध्वनिः। येन शत्रुशस्त्रैः क्षतैः खण्डितेः अवसाने हृष्टचीनलेनिपन्नं तिवंशापि खण्डिताः पतेति॥ १४ पार्थिवं। यवीनाम
यावितचिनीत्याति ध्वगानवसमाहि सवत्र। पार्थिवमात्मीयं इत्स्नस्व धंगामि तायाः विनोचिः। शनीः संग्रामेषु अपा
स्य त्यक्ता। गौरवाश्रयुद्धतायाः इतोः। अन्यापि प्रतिगुद्धतनमतिद्रुतगमनाय त्यक्रमी हनेव पुष्पिति ध्वनिः॥
१५ सा निमाप। तत्र ति घयः आगैत्रकाः दूतानीय रमां नापश्यं तिनोपगच्छति। सा विसापमिवसवाच्यमिवा तेनेमी

त्रैलोक्याश्रियं नश्वरं च क्रमेन्ये। आत्मोदनस्मरणमेव कार्यंकदर्थयस्याः नीयो मृत्यात्मपीडाप्यौ च धर्थं संविनो
तसकर्यः। एवमुपस्वयवतीमपि नयक्रमेन्यो॥१६ सर्वपुण्या॥ जन्मांतरोपार्जितपुण्यासीपद्योघ्ययनिवद्धाः लक्ष्मी॥
ग्रनाए व विचारिनाः विपदेए वा विपदि च शांतिकं कर्म क्रियते। पात्रकर कमले समर्प्यते श्रीगोमापस्तुशान्तिकवि
धानैर्यात्राहृष्टो॥१७ पं श्रीगोविंददेवकृतिनियं॥ १७॥ नह्मिमृज्य॥ तस्मादस्मिन्विषये सहसास्फीतं प्रवृद्धं च घमज्ञाने
संशयजनकं। ममविनाश्य। भगवतः कृतिसानैः श्रवणसानन्दैः वचनैः॥ अथेदानीं अघमर्षणमयूपे नृयतां। अ
 घमर्षणजवो पि वेदेसानन्दूताः अर्थं चमाशयंतिडतिध्वनिः॥१८ इत्युदीर्घ॥ विनयसमृद्धिं अवसानन्नेरेणवद्धियनष्ट
निष्कर्षोक्त मुक्त्वा मघवा। नेत्रालांसहस्रं निर्निमेषं कापि पुरवनिघाया स्थितः॥१९ वीक्ष्यतस्या विनेयपनिपाके विशु
द्धि ईंद्रस्य त्रैलोक्यनाज्ञापत्रोगन्नपं। यदं स्पृशतो वि वीक्ष्य। नारदः प्रमद गद्गदया आनंदसीमं नर्कन्याउन्त्या॥
स्मितायैसर्वं कथयामास॥२० निन्दिता॥ यत्र सुकृतं धर्म्मे सुण्यी शतमखी निन्दितायां चिन्ता तत्यानिघ्रे अमरुस्य॥
तत्फलयज्ञफलं घवपर्नं घदिलेहा अवज्ञा॥ किमिति हेला अवज्ञा॥ किमिति हेलाननवतीत्याशीक्याह। दुःखेनो
पार्जितिं अघिकादर्नैर्नदं पुनर्यतः॥ २१ समादः॥ तत्वविभूतयो याचामगोचनाश्र विनामसंभावनायीयत विनयी

नविनयं तेनापनयंति। इह कइव अदृष्टाति अपि तु नको पि विधेयादिपन मामो अव्यभिचारी अनुभवः न आहतत्र
ता त्रैलोक्यनाज्यसीपद्यपि नवति नयो महाननुभूयत इत्यर्थः॥ २२ श्री मचान्द्राल लक्ष्मीवाऽल्पमति थि देयं कनवाणि आ
त्मापत्रोगपरतानपुक्ता। इत्ति पश्यतोभवतः वहिरिव अत्यंतमेपि काप्य पूर्वा आधिकावकृतनाश्रैयैद हृष्टिसृष्टि॥
यथा वहिरिस चक्षुः सहस्रं तथा अंतः अधिकसंज्ञानां वाह्य चक्षुषदं ज्ञाईं न शक्यते ज्ञान चक्षुषैव पर्नं दृश्यते॥ २३॥
आ४ स्वजावा। हर्षप्रकृतिसुं दरे रनुभावेवदीये नत्यर्थमुक्तौ गिराजाता। स्वर्गं प्रसाधिः अतिक्रांतसर्यसाधुसाधुसम्य
